International Journal of Sanskrit Research 2017; 3(6): 136-137

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 136-137
© 2017 IJSR
www.anantaajournal.com
Received: 04-09-2017
Accepted: 05-10-2017

**मञ्जुदत्तः**
विद्यावारिधिशोधछात्रा,
गौडवङ्गविश्वविद्यालयः,
मालदा, पश्चिमवङ्गः।

**Correspondence**
**मञ्जुदत्तः**
विद्यावारिधिशोधछात्रा,
गौडवङ्गविश्वविद्यालयः,
मालदा, पश्चिमवङ्गः।

# टीकाकारः लौगाक्षिभास्करस्य प्रकाशटीकायां सन्निकर्षः व्याख्या

**मञ्जुदत्तः**

**प्रस्तावना**

लौगाक्षिभास्करकृतग्रन्थानाम् *अर्थसंग्रहः* प्रकाशितग्रन्थो भवति। स मीमांसाविषयकग्रन्थो भवति। *अर्थसंग्रहग्रन्थस्य* प्रणेता भास्करः लौगाक्षिभास्करः वा एतस्मिन् विषये संशयमस्ति। प्रचलितमतानुसारं यतः *अर्थसंग्रहग्रन्थस्य ग्रन्थकारः* लौगाक्षिभास्करो भवति। अतः अस्यापि ग्रन्थस्य रचयिता लौगाक्षिभास्करः इति एवं मन्यते। *New Catalogus Catalogorum*, vol-26. --- इति ग्रन्थानुसारं *अर्थसंग्रहः* तथा *न्यायसिद्धान्तमञ्जरीप्रकाश* इति द्वयो-ग्रन्थयोः रचयिता लौगाक्षिभास्करो भवति।

*अर्थसंग्रहः* ग्रन्थस्यान्तिमे सः स्वस्य नाम भास्करः एवमलिखत्। अतः एवं मन्यते लौगाक्षि तस्य पितुः पारिवारिकः नाम वा भवति। लुक् + क्विप्, यत् लुक्षः अभवत्। लुक् + अच् = लुकः लुपो वा भवति। लुके अक्षिणी यस्य = लुगाक्षः। लुगाक्षस्य अपत्यम् इत्यर्थे लुगाक्ष + इञ् = लौगाक्षिः। वाच्यार्थे नष्टचक्षुषः पुत्रः लक्ष्यार्थे विद्यारूपः चक्षुहीनस्य पुत्रः। वाच्यार्थः लक्ष्यार्थः वा कस्य ग्रहणं प्रयोज्यम्, एकस्य उभयोः ग्रहणं वा एतस्य निर्णयं दुष्करमेव भवति। मीमांसादि विविधविषये तस्य पाण्डित्यं सूर्य इव, एतद् कारणवशात् तस्य नाम भास्करः एवं मन्यते। पूर्वोक्तकारणवशात् शब्दद्वयं मिलित्वा लौगाक्षिभास्करः इति प्रसिद्धः अभवत् एवं समालोचकाः विद्वद्जनाः अनुमित्वा वदन्ति।

लौगाक्षिभास्करस्य आनुमानिकः समयः षोडशशताब्दी भवति।[1] *अर्थसंग्रहस्य* मङ्गलश्लोके वासुदेवः रमा नामद्वयं गृहीत्वा समालोचकानां संशयमस्ति। कोऽपि अवदत् नामद्वयं तस्य पितरौ नाम, कोऽपि गुरु-गुरुपत्न्योः नाम, कोऽपि वा अवदत् लौगाक्षिभास्करः भगवान् विष्णोपासक आसीत्, स पाञ्चरात्रसम्प्रदायस्य वैष्णव वा भवति। अध्यापकः कीथमहोदयः अवदत् लौगाक्षिभास्करस्य पितुर्नाम मुद्गलः भवति।[2] एवञ्च New Catalogus Catalogorum इति ग्रन्थस्य षडविंशखण्डानुसारं लौगाक्षिभास्करस्य पितुर्नाम मुद्गलभट्टः पितामहस्य नाम रुद्रभट्टो भवति इति उक्तम्।

श्रीमान् जानकीनाथचूडामणिभट्टाचार्यस्यानुमानिककालः 1550 शताब्दी[3] 1490 – 1515 शताब्दी वा भवति।[4] स वङ्गस्थ नवद्वीपनिवासी नैयायिक आसीत्। जानकीनाथभट्टाचार्यमहाशयस्य पुत्रद्वयमासीत् राघवपञ्चानन – रामभद्रसार्वभौमश्च। रामभद्रसार्वभौमस्यापि आनुमानिककालः षोडशशताब्दी भवति। श्रीमान् जानकीनाथशर्मामहाशयस्य जानकीनाथभट्टाचार्यः चूडामणिभट्टाचार्यः चिन्तामणिभट्टाचार्यः जानकीनाथचूडामणिभट्टाचार्यः श्रीनाथः आचार्यः चूडामणिः इति नामानि अपि प्रसिद्धो भवति।

---

1 वाचस्पतिः उपाध्यायः, *अर्थसंग्रहः*, चौखम्भा ओरियेन्टालिया, 1st ed-1977.

2 डा. गुरुशङ्करः मुखोपाध्यायः, *अर्थसंग्रहः*, संस्कृतः वुकः डिपो, 1st ed-2005.

3 New Catalogus Catalogorum, vol – 7, k. Kunjunni Raja, University of Madras, Sanskrit Series – 32, 1973.

4 वाङ्गालीर सारस्वत अवदान – वङ्गे नव्यन्यायचर्चा, दीनेशचन्द्र भट्टाचार्यः, वङ्गीय साहित्य परिषद, कल -6। पृ-107

जानकीनाथशर्मनः पितुर्नाम श्रीकराचार्यो भवति। लौगाक्षिभास्करकृतः *न्यायसिद्धान्तमञ्जरीप्रकाशः* श्रीमान् जानकीनाथशर्माविरचितः *न्यायसिद्धान्तमञ्जय*मिकः टीकाग्रन्थो भवति।

*न्यायसिद्धान्तमञ्जरी* जानकीनाथभट्टाचार्यचूडामणिविरचितः। अयं ग्रन्थन्यायविषयको भवति। भारतवर्षस्य सर्वत्र अयं ग्रन्थः प्रचारमलभत्। आश्चर्यमेकं वङ्गे अस्य ग्रन्थस्य प्रचारं तादृशं नासीत्। वङ्गबहिस्थ काश्यादिविद्यास्थाने नव्यन्यायशास्त्राभ्यासकाले अस्य ग्रन्थस्य प्रत्यक्षादिखण्डमधिकृत्य पाठारम्भः अभवत्। न्यायदर्शनस्य प्रमाणांशमुत्सीकृत्य ग्रन्थः अयं विरचितो भवति। प्रत्यक्ष-अनुमान-उपमान-शब्दः इति परिच्छेदचतुष्टयकमयं ग्रन्थः समाप्तो भवति। *न्यायसिद्धान्तमञ्जरी* बहुवारं पुनर्मुद्रितः अभवत्। काश्यां 1941 – 43 शताब्दे यत्मुद्रणमभवत् तस्य चित्रादिकं संग्रहं कृत्वाहं कार्यं करोमि। श्रीमतः जानकीनाथशर्मनः महाशयस्य *मणिमरीचिः, तात्पर्यदीपिका, आत्मतत्त्वदीपिका*दयः ग्रन्थाः सन्ति। पुत्ररामभद्ररचितः *न्यायरहस्येन* सह संयुक्तरुपेण *आन्वीक्षिकीतत्त्वविवरणम्* नाम अपरापरं ग्रन्थमस्ति।

लौगाक्षिभास्करस्य बहुषु ग्रन्थेषु *न्यायसिद्धान्तमञ्जरीप्रकाशः* अन्यतमो भवति। श्रीमतः जानकीनाथभट्टाचार्यमहोदयस्य *न्यायसिद्धान्तमञ्जर्या*मुपरि इह एकः अप्रकाशितः टीका भवति। यथा *न्यायसिद्धान्तमञ्जर्यां* प्रत्यक्षादि परिच्छेदचतुष्टयमस्ति तथैव अस्मिन् ग्रन्थे अपि अस्ति। प्रकाशितः मीमांसाशास्त्रविषयकः ग्रन्थः *अर्थसंग्रहः* यथा नवीनपाठार्थीनां कृते उपयोगि भवति तथैव अयं ग्रन्थः न्यायशास्त्रविषये सुबोध्यः सहजः सरलरुपेणोपयोगि भवति। *न्यायसिद्धान्तमञ्जरी* इति ग्रन्थः भारतबर्षस्य सर्वत्र प्रचारलाभमकरोत् एतद्विषयः न्यायसिद्धान्तमञ्जरीप्रकाशस्य पाण्डुलिपिं दृष्ट्वा अवबुध्यते। भारतवर्षस्य दक्षिणाञ्चले, दक्षिण – पश्चिमाञ्चले, पूर्वाञ्चले, दक्षिण – पूर्वाञ्चले अस्य ग्रन्थस्य पाण्डुलिपिः अस्ति। एतद्व्यतिरिक्तः विदेशे अपि *न्यायसिद्धान्तमञ्जरीप्रकाशस्य* पाण्डुलिपिः उपलभ्यते। एतद् दृष्ट्वा *न्यायसिद्धान्तमञ्जरी - न्यायसिद्धान्तमञ्जरीप्रकाशस्य* च जनमनसि कीदृशः प्रभावः आसीत् अनुमीयते।

न्यायसिद्धान्तमञ्जरी ग्रन्थे जानकीनाथशर्मामहोदयः सन्निकर्षं व्याख्यायते यथा - तस्य चेन्द्रिय सन्निकृष्टार्थग्राहकत्वात्सन्निकर्षाः सहकारिणः के ते सन्निकर्षाः संयोगः संयुक्त समवायोः संयुक्तसमवेतसमवायः समवायः समवेतसमवायोः विशेषणताच्च।

अथ केन सन्निकर्षेण किंगृह्यते द्रव्यंसंयोगेन गृह्यते। शब्देतरगुणाः कर्मद्रव्यगता जातिः संयुक्त समवायेन। भवति हि घटादिकं चक्षुरादि संयुक्तं तत्र समवेतं रूपादि स्पन्दोद्रव्यत्वादि जातिश्च शब्देतर गुणकर्मगताजातिः संयुक्त समवेतसमवायेन भवति हि चक्षुरादि संयुक्तो घटादि स्तत्समवेतं रूपादि तत्र समवायो रूपत्वादेः। शब्दः समवायेन गृह्यते कर्णशष्कुल्यवच्छिन्ने नभसि शब्दस्य समवायात्। शब्दगता तु जातिः समवेतसमवायेन श्रवणसमवेते शब्दे शब्दत्वस्य समवायात्। विशेषणतया समवायोऽभावश्च गृह्यते तत्र संयोगसमवाययोरभावात्। सा च विशेषणता द्विविधा। इन्द्रियविशेषणता इन्द्रियसन्निकृष्टविशेषणता च। तत्रेन्द्रिय विशेषणतया शब्दाभावो गृह्यते इन्द्रियरूपे श्रवणे तस्य विशेषणत्वात्। इन्द्रियसन्निकृष्टविशेषणतया भूतलादौ घटाभावादि इन्द्रियसन्निकृष्टे भूतले तस्य विशेषणत्वात् इन्द्रियसन्निकृष्टविशेषणतापि बहुविधा। सन्निकर्षस्य वहुत्वदवसेया।

सामान्यतया यद् व्याख्या प्रचलति तस्योल्लेखं स कृतवान् 'विशेषणता' पदेनापि सन्निकर्षस्य विस्तारं प्रकाशं वा कर्तुं वयं शक्नुमः एतस्योल्लेखमपि च तस्य ग्रन्थे उल्लेखितवान्। 'विशेषणता' पदेन परं स व्याख्या न कृतवान्। विशेषणता पदेन सन्निकर्षस्य व्याख्या वयं लौगाक्षिभास्करस्य प्रकाशः न्यायसिद्धान्तमञ्जरीप्रकाशः वा नाम्नः टीकाग्रन्थे उपलब्धवान् यथा - नन्विन्द्रियसन्निकृष्टविशेषणता इन्द्रियसंयुक्तविशेषणतैव। तथा च रूपादौ रसत्वाभावप्रत्यक्षं न स्यादित्यत्र आह। इन्द्रियसन्निकृष्टेति। इन्द्रियसन्निकृष्टविशेषणतेत्यत्र इन्द्रियसन्निकर्षस्य संयोगादेर्बहुविधस्य प्रवेशात्तादृशविशेषणतापि बहुविधेत्यर्थः। तद्यथा। इन्द्रियसंयुक्तविशेषणता इन्द्रियसंयुक्तसमवेतविशेषणता। इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता। इन्द्रियसमवेतविशेषणता। इन्द्रियसमवेतसमवेतविशेषणता। इन्द्रियविशेषणविशेषणतेत्यादि। आद्य या भूतले घटाभावग्रहः। द्वितीयया घटरूपादौ रसत्वाभावग्रहः। तृतीयया रूपत्वादौ रसत्वाभावग्रहः। चतुर्थ्या श्रोत्रसमवेतककारे खत्वाभावग्रहः। पञ्चम्या कत्वे खत्वाभावग्रहः। षष्ठ्या श्रोत्रविशेषणीभूतककाराभावे खत्वाभावग्रह इति बोध्यम्।

इतिपूर्वे न्यायविषयकः कोऽपि ग्रन्थे सन्निकर्षस्य एतादृश व्याख्या नोपलभ्यते। टीकाकारः लौगाक्षिभास्करः तस्य टीकाग्रन्थः प्रकाशे सन्निकर्षस्य एतादृश व्याख्या प्रथमः नवीनश्चरूपेण क्रियते। ईदृश बहवः नवीनव्याख्या स तस्य टीकाग्रन्थे कृतवान्। मूले यत्र यत्र व्याख्या प्रयोजनीयः तत्र तत्र स स्वकीयस्वकपोलकल्पितव्याख्या प्रयोजितवान्।

## References


1. Bhattacharya. Dinesh *Bangalir saraswata Abadan - bange navya nyaya charcha*, Bangiya Sahitya Parisad, kol. 1951, 6.
2. Chakraborty, Rai Monmohan. History of Navya Nyaya in Bengal and Mithila. Journal of the Asiatic Society. 1915; XI:259-292.
3. Das Karunasindhu, Basu Ratna. Aspects of Manuscriptology, The Asiatic Society, Kolkata, 2005.
4. Dash. Siniruddha New Catalogus Catalogorum, University of Madras, 2011-2013, 24-26.
5. Goswami. Subuddhi Charan Editing of Nyaya Texts from Mss.-Sources, Journal of the Department of Sanskrit, Rabindra Bharati University, Viii:65-77. Kol-50.
6. Mukhopadhay, Gurusankar Arthasangraha, 1st ed, Sanskrita Book Dipo, Kol -6, 2005.
7. Raja Kunjunni K. New Catalogus Catalogorum, University of Madras, Sanskrit series, 1973; 7:32.
8. Vargananda, Arthasangraha. 1st ed 1411 bangabda, Sanskrita Pustak Bhandar, Kol -6.